**8.राष्ट्रियबालिकादिवसोत्सवः- (20जनवरी2023)** केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरघुनाथकीर्तिपरिसरे परिसरनिदेशकानां प्रो.एम. चन्द्रशेखरमहाभागानामाध्यक्ष्ये 24-01-2023दिनाङ्के राष्ट्रियबालिकादिवसोत्सवः समायोजितः।

तत्र विशिष्टातिथित्वेन डॉ.रेखाध्यानी प्राचार्यामहोदाया, राजकीय-बालिका-इन्टर-कालेज देवप्रयागात् समागत्य बालिकानामुत्साहवर्धनाय स्वविचारान् प्रस्तुतवती। कार्यक्रमेऽस्मिन् स्व-स्वकक्षायां लब्धसर्वाधिकाङ्काः परिसरीयाः छात्राः क्रमशः आचार्यकक्षायां कोमलध्यानी, शास्त्रीकक्षायां श्रुतिशर्मा, प्राक्शास्त्रीकक्षायां मौनिकानौगाईं इत्येताः पुरस्कृताः समभवन्। सम्पूर्णकार्यक्रमः परिसरीयबालिकाभिः सम्पादितः। कतिपयबालिकाभिः स्वविचाराः प्रस्तुतयश्चः प्रकटीकृताः। कार्यक्रमसंयोजकाः साहित्यविभागीयाचार्याः डॉ. रामबहादुरदूबेमहाभागाः आसन्। कार्यक्रमसञ्चालनं शास्त्रीकक्षायाः छात्रा मधु कृतवती। स्वागतभाषणं परिसरीयव्याकरणविभागीया अध्यापिका डॉ. मनीषाआर्यामहोदया कृतवती। आध्यक्षीयोद्बोधनेन परिसरीयनिदेशकाः प्रो.एम.चन्द्रशेखरमहाभागाः सर्वानुपस्थितानन्गृहीतवन्तः।